
हर हर शंकर ॐ जय जय शंकर





श्री-वेदव्यासाय नमः

# श्रीमद्-आद्य-शंकर-भगवत्पाद-परंपरागत-मूलाम्नाय-सर्वज्ञ-पीठम्
# श्री-कांची-कामकोटि-पीठम्
# जगद्गुरु-श्री-शंकराचार्य-स्वामि-श्रीमठ-संस्थानम्

# ॥ श्रीनृसिंह-जयंती-लघु-पूजा-पद्धतिः ॥

वैशाख-शुक्ल-चतुर्दशी / ५१२८-मेषः-१७ / 30.4.2026

(आचम्य)

[विघ्नेश्वरपूजां कृत्वा।]

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशांतये॥

प्राणान् आयम्य। (अप उपस्पृश्य, पुष्पाक्षतान् गृहीत्वा)

ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं शुभे शोभने मुहूर्ते अद्य ब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वतमन्वंतरे अष्टाविंशतितमे कलियुगे प्रथमे पादे जंबूद्वीपे भारतवर्षे भरतखंडे मेरोः दक्षिणे पार्श्वे अस्मिन् वर्तमाने व्यावहारिकाणां प्रभवादीनां षष्ठ्याः संवत्सराणां मध्ये **पराभव**-नाम-संवत्सरे **उत्तरायणे वसंत**-ऋतौ **मेष-वैशाख**-मासे **शुक्ल**-पक्षे **चतुर्दश्यां** शुभतिथौ **गुरु**वासरयुक्तायां **चित्रा**-नक्षत्र-युक्तायां **वज्र**-योगयुक्तायां **गरजा**-करण (०८:३०; **वणिजा**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **चतुर्दश्यां** शुभतिथौ
**भगवतो नरसिंहस्य प्रसादेन** —

वेद-धर्म-शास्त्र-परिपालन-सभा
9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org

- अखंड-भारते अन्यत्र च सनातन-धर्म-अवलंबिनां सुरक्षा-सिद्धये
- जनानां विघ्न-निवृत्ति-पूर्वक-सत्कार्य-प्रवृत्ति-द्वारा ऐहिक-आमुष्मिक-अभ्युदय-प्राप्त्यर्थम्, असत्कार्येभ्यः निवृत्त्यर्थं
- साधूनां धार्मिकाणां च धैर्य-विश्वास-पुष्टि-सिद्ध्यर्थम्, आधर्मिक-शक्तीनां विनाशार्थं,
- भारतीयानां संततेः सनातन-संप्रदाये श्रद्धा-भक्त्योः अभिवृद्ध्यर्थं
- सर्वेषां द्विपदां चतुष्पदाम् अन्येषां च प्राणि-वर्गाणाम् आरोग्य-युक्त-सुख-जीवन-अवाप्त्यर्थम्
- अस्माकं सह-कुटुंबानां धर्म-अर्थ-काम-मोक्ष-रूप-चतुर्विध-पुरुषार्थ-सिद्ध्यर्थं विवेक-वैराग्य-सिद्ध्यर्थं

श्री नृसिंह-जयंती-पुण्यकाले यथाशक्ति-ध्यान-आवाहनादि-षोडशोपचारैः श्री-नृसिंह-पूजां करिष्ये। तदंगं कलशपूजां च करिष्ये। [कलशपूजां कृत्वा।]

## प्रधान-पूजा

ध्यायामि देवदेवं तं शंखचक्रगदाधरम्।
नृसिंहं भीषणं भद्रं लक्ष्मीयुक्तं विभूषितम्॥

श्री-लक्ष्मी-नृसिंहं ध्यायामि।

आगच्छ देव देवेश जगद्योने रमापते।
बिंबेऽस्मिंस्त्वदधिष्ठाने सन्निधेहि कृपां कुरु॥

श्री-लक्ष्मी-नृसिंहम् आवाहयामि।

श्री-लक्ष्मी-नृसिंहाय नमः, आसनं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, पाद्यं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, अर्घ्यं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, आचमनीयं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, मधुपर्कं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, स्नपयामि। स्नानानंतरम् आचमनीयं समर्पयामि।

श्री-लक्ष्मी-नृसिंहाय नमः, वस्त्रं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, यज्ञोपवीतं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, दिव्यपरिमलगंधान् धारयामि।
गंधस्योपरि हरिद्राकुंकुमं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, अक्षतान् समर्पयामि। पुष्पैः पूजयामि।

# ॥ श्री-लक्ष्मी-नृसिंहाष्टोत्तरशतनामावलिः ॥

श्रीनृसिंहाय नमः
महासिंहाय नमः
दिव्यसिंहाय नमः
महाबलाय नमः
उग्रसिंहाय नमः
महादेवाय नमः
उपेंद्राय नमः
अग्निलोचनाय नमः
रौद्राय नमः
शौरये नमः १०
महावीराय नमः
सुविक्रमपराक्रमाय नमः
हरिकोलाहलाय नमः
चक्रिणे नमः
विजयाय नमः
अजयाय नमः
अव्ययाय नमः
दैत्यांतकाय नमः
परब्रह्मणे नमः
अघोराय नमः २०
घोरविक्रमाय नमः
ज्वालामुखाय नमः
ज्वालामालिने नमः
महाज्वालाय नमः
महाप्रभवे नमः
निटिलाक्षाय नमः
सहस्राक्षाय नमः
दुर्निरीक्ष्याय नमः
प्रतापनाय नमः
महादंष्ट्राय नमः ३०
प्राज्ञाय नमः
हिरण्यक-निषूदनाय नमः
चंडकोपिने नमः
सुरारिघ्नाय नमः
सदार्तिघ्नाय नमः
सदाशिवाय नमः
गुणभद्राय नमः
महाभद्राय नमः
बलभद्राय नमः
सुभद्रकाय नमः ४०
करालाय नमः
विकरालाय नमः
गतायुषे नमः

सर्वकर्तृकाय नमः
भैरवाडंबराय नमः
दिव्याय नमः
अगम्याय नमः
सर्वशत्रुजिते नमः
अमोघास्त्राय नमः
शस्त्रधराय नमः ५०
सव्यजूटाय नमः
सुरेश्वराय नमः
सहस्त्रबाहवे नमः
वज्रनखाय नमः
सर्वसिद्धये नमः
जनार्दनाय नमः
अनंताय नमः
भगवते नमः
स्थूलाय नमः
अगम्याय नमः ६०
परावराय नमः
सर्वमंत्रैकरूपाय नमः
सर्वयंत्रविदारणाय नमः
अव्ययाय नमः
परमानंदाय नमः
कालजिते नमः
खगवाहनाय नमः
भक्तातिवत्सलाय नमः
अव्यक्ताय नमः
सुव्यक्ताय नमः ७०
सुलभाय नमः
शुचये नमः
लोकैकनायकाय नमः
सर्वाय नमः
शरणागतवत्सलाय नमः
धीराय नमः
धराय नमः
सर्वज्ञाय नमः
भीमाय नमः
भीमपराक्रमाय नमः ८०
देवप्रियाय नमः
नुताय नमः
पूज्याय नमः
भवहृते नमः
परमेश्वराय नमः
श्रीवत्सवक्षसे नमः
श्रीवासाय नमः
विभवे नमः
संकर्षणाय नमः
प्रभवे नमः ९०
त्रिविक्रमाय नमः
त्रिलोकात्मने नमः
कालाय नमः
सर्वेश्वराय नमः
विश्वंभराय नमः
स्थिराभाय नमः
अच्युताय नमः
पुरुषोत्तमाय नमः
अधोक्षजाय नमः
अक्षयाय नमः १००
सेव्याय नमः
वनमालिने नमः
प्रकंपनाय नमः


9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org

गुरवे नमः
लोकगुरवे नमः
स्रष्ट्रे नमः
परस्मै ज्योतिषे नमः
परायणाय नमः १०८

श्री-लक्ष्मी-नृसिंहाय नमः, नानाविध-परिमल-पत्र-पुष्पाणि समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, धूपमाघ्रापयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, दीपं दर्शयामि।
नैवेद्यम्। श्री-लक्ष्मी-नृसिंहाय नमः, अमृतं महानैवेद्यं पानकं च निवेदयामि।
निवेदनानंतरम् आचमनीयं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, कर्पूरतांबूलं समर्पयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, मंगल-नीराजनं दर्शयामि।
श्री-लक्ष्मी-नृसिंहाय नमः, प्रदक्षिणनमस्कारान् समर्पयामि।

# नृसिंहावतारघट्टः

सत्यं विधातुं निजभृत्यभाषितं
व्याप्तिं च भूतेष्वखिलेषु चात्मनः।
अदृश्यतात्यद्भुतरूपमुद्वहन्
स्तंभे सभायां न मृगं न मानुषम्॥
—श्रीमद्भागवतम् ७-८-१८

प्रार्थनाः समर्पयामि।

कायेन वाचा मनसेंद्रियैर्वा
बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै
नारायणायेति समर्पयामि॥

अनेन पूजनेन श्री-लक्ष्मी-नृसिंहः प्रीयताम्।

ॐ तत्सद्ब्रह्मार्पणमस्तु।

❀❀❀

# ॥ लक्ष्मी-नृसिंह-करुणारस-स्तोत्रम् ॥



https://youtu.be/ztgociIqUQI

श्रीमत्-पयोनिधि-निकेतन चक्र-पाणे
भोगींद्र-भोग-मणि-राजित-पुण्य-मूर्ते।
योगीश शाश्वत शरण्य भवाब्धि-पोत
लक्ष्मी-नृसिंह मम देहि करावलंबम्॥ १ ॥

ब्रह्मेंद्र-रुद्र-मरुदर्क-किरीट-कोटि-
संघट्टितांघ्रि-कमलामल-कांति-कांत।
लक्ष्मी-लसत्-कुच-सरोरुह-राजहंस
लक्ष्मी-नृसिंह मम देहि करावलंबम्॥ २ ॥

संसार-दाव-दहनाकर-भी-करोरु-
ज्वालावलीभिरतिदग्ध-तनूरुहस्य ।
त्वत्-पाद-पद्म-सरसी शरणागतस्य
लक्ष्मी-नृसिंह मम देहि करावलंबम्॥ ३ ॥

संसार-जाल-पतितस्य जगन्निवास
सर्वेंद्रियार्थ-बडिशाग्र-झषोपमस्य ।
प्रोत्कंपित-प्रचुर-तालुक-मस्तकस्य
लक्ष्मी-नृसिंह मम देहि करावलंबम्॥ ४ ॥

संसार-कूपमतिघोरमगाध-मूलं
संप्राप्य दुःख-शत-सर्प-समाकुलस्य।
दीनस्य देव कृपया पदमागतस्य
लक्ष्मी-नृसिंह मम देहि करावलंबम्॥ ५ ॥

संसार-भी-कर-करींद्र-कराभिघात-
निष्पीड्यमान-वपुषः सकलार्ति-नाश।
प्राण-प्रयाण-भव-भीति-समाकुलस्य
लक्ष्मी-नृसिंह मम देहि करावलंबम्॥६॥

संसार-सर्प-विष-दिग्ध-महोग्र-तीव्र-
दंष्ट्राग्र-कोटि-परिदष्ट-विनष्ट-मूर्तेः ।
नागारि-वाहन सुधाब्धि-निवास शौरे
लक्ष्मी-नृसिंह मम देहि करावलंबम्॥७॥

संसार-वृक्षमघ-बीजमनंत-कर्म-
शाखा-युतं करण-पत्रमनंग-पुष्पम्।
आरुह्य दुःख-फलितं पततो दयालो
लक्ष्मी-नृसिंह मम देहि करावलंबम्॥८॥

संसार-सागर-विशाल-कराल-काल-
नक्र-ग्रह-ग्रसित-निग्रह-विग्रहस्य ।
व्यग्रस्य राग-निचयोर्मि-निपीडितस्य
लक्ष्मी-नृसिंह मम देहि करावलंबम्॥९॥

संसार-सागर-निमज्जन-मुह्यमानं
दीनं विलोकय विभो करुणा-निधे माम्।
प्रह्लाद-खेद-परिहार-परावतार
लक्ष्मी-नृसिंह मम देहि करावलंबम्॥१०॥

संसार-घोर-गहने चरतो मुरारे
मारोग्र-भीकर-मृग-प्रचुरार्दितस्य ।
आर्तस्य मत्सर-निदाघ-सुदुःखितस्य
लक्ष्मी-नृसिंह मम देहि करावलंबम्॥११॥

बद्ध्वा गले यम-भटा बहु तर्जयंतः
कर्षंति यत्र भव-पाश-शतैर्युतं माम्।
एकाकिनं पर-वशं चकितं दयालो
लक्ष्मी-नृसिंह मम देहि करावलंबम्॥१२॥

लक्ष्मी-पते कमल-नाभ सुरेश विष्णो
यज्ञेश यज्ञ मधुसूदन विश्व-रूप।
ब्रह्मण्य केशव जनार्दन वासुदेव
लक्ष्मी-नृसिंह मम देहि करावलंबम्॥ १३॥

एकेन चक्रमपरेण करेण शंखम्
अन्येन सिंधु-तनयामवलंब्य तिष्ठन्।
वामेतरेण वरदाभय-पद्म-चिह्नं
लक्ष्मी-नृसिंह मम देहि करावलंबम्॥ १४॥

अंधस्य मे हृत-विवेक-महाधनस्य
चोरैर्महा-बलिभिरिंद्रिय-नामधेयैः ।
मोहांधकार-कुहरे विनिपातितस्य
लक्ष्मी-नृसिंह मम देहि करावलंबम्॥ १५॥

प्रह्लाद-नारद-पराशर-पुंडरीक-
व्यासादि-भागवत-पुंगव-हृन्निवास ।
भक्तानुरक्त-परिपालन-पारिजात
लक्ष्मी-नृसिंह मम देहि करावलंबम्॥ १६॥

लक्ष्मी-नृसिंह-चरणाब्ज-मधु-व्रतेन
स्तोत्रं कृतं शुभ-करं भुवि शंकरेण।
ये तत् पठंति मनुजा हरि-भक्ति-युक्ताः
ते यांति तत्-पद-सरोजमखंड-रूपम्॥ १७॥

॥ इति श्रीमद्-गोविंदभगवत्पाद-शिष्य-श्रीमत्-शंकर-भगवत्पाद-विरचितं
श्री-लक्ष्मी-नृसिंह-करुणारस-स्तोत्रं संपूर्णम्॥

❁

# ॥ श्री-लक्ष्मी-नृसिंह-पंचरत्न-स्तोत्रम्॥



https://youtu.be/Y3vZM3b5SVM

त्वत्-प्रभु-जीव-प्रियमिच्छसि चेन्नर-हरि-पूजां कुरु सततं
प्रतिबिंबालंकृति-धृति-कुशलो बिंबालंकृतिमातनुते।
चेतोभृंग भ्रमसि वृथा भव-मरु-भूमौ विरसायां
भज भज लक्ष्मी-नरसिंहानघ-पद-सरसिज-मकरंदम्॥ १ ॥

शुक्तौ रजत-प्रतिभा जाता कटकाद्यर्थ-समर्था चेद्
दुःखमयी ते संसृतिरेषा निर्वृति-दाने निपुणा स्यात्।
चेतोभृंग भ्रमसि वृथा भव-मरु-भूमौ विरसायां
भज भज लक्ष्मी-नरसिंहानघ-पद-सरसिज-मकरंदम्॥ २ ॥

आकृति-साम्याच्छाल्मलि-कुसुमे स्थल-नलिनत्व-भ्रममकरोः
गंध-रसाविह किमु विद्येते विफलं भ्राम्यसि भृश-विरसेऽस्मिन्।
चेतोभृंग भ्रमसि वृथा भव-मरु-भूमौ विरसायां
भज भज लक्ष्मी-नरसिंहानघ-पद-सरसिज-मकरंदम्॥ ३ ॥

स्रक्-चंदन-वनितादीन् विषयान् सुख-दान् मत्वा तत्र विहरसे
गंध-फली-सदृशा ननु तेऽमी भोगानंतर-दुःख-कृतः स्युः।
चेतोभृंग भ्रमसि वृथा भव-मरु-भूमौ विरसायां
भज भज लक्ष्मी-नरसिंहानघ-पद-सरसिज-मकरंदम्॥ ४ ॥

तव हितमेकं वचनं वक्ष्ये शृणु सुख-कामो यदि सततं
स्वप्ने दृष्टं सकलं हि मृषा जाग्रति च स्मर तद्-वदिति।
चेतोभृंग भ्रमसि वृथा भव-मरु-भूमौ विरसायां
भज भज लक्ष्मी-नरसिंहानघ-पद-सरसिज-मकरंदम्॥ ५ ॥

॥ इति श्रीमद्-गोविंदभगवत्पाद-शिष्य-श्रीमत्-शंकर-भगवत्पाद-विरचितं
श्री-लक्ष्मी-नृसिंह-पंचरत्न-स्तोत्रं संपूर्णम्॥

वेद-धर्म-शास्त्र-परिपालन-सभा
9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org